

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## सप्तमकाण्डे प्रथमः प्रश्नः

### अश्वमेधगतमन्त्राणामभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

प्रजननम् ज्योतिः । प्रजननमिति प्र—जननम् । ज्योतिरग्निः । अग्निर् देवतानाम् । देवतानाम् ज्योतिः । ज्योतिर् विराट् । विराट् छन्दसाम् । विराडिति वि—राट् । छन्दसाम् ज्योतिः । ज्योतिर् विराट् । विराड् वाचः । विराडिति वि—राट् । वाचोऽग्नौ । अग्नौ सम् । सम् तिष्ठते । तिष्ठते विराजम् । विराजमभि । विराजमिति वि—राजम् । अभि सम् । सम् पद्यते । पद्यते तस्मात् । तस्मात् तत् । तज् ज्योतिः । ज्योतिरुच्यते । उच्यते द्वौ । द्वौ स्तोमौ । स्तोमौ प्रातस्सवनम् । प्रातस्सवनँव्वँहतः । प्रातस्सवनमिति प्रातः—सवनम् । वहतो यथा । यथा प्राणः । प्राणश्च । प्राण इति प्र—अनः । चापानः । अपानश्च । अपान इत्यप—अनः । च द्वौ । द्वौ माद्ध्यन्दिनम् । माद्ध्यन्दिनꣳ सवनम् । सवनय्यँथा । यथा चक्षुः । चक्षुश्च । च श्रोत्रम् । श्रोत्रम् च । च द्वौ । द्वौ तृतीयसवनम् । तृतीयसवनय्यँथा । तृतीयसवनमिति तृतीय—सवनम् । यथा वाक् । वाक् च । च प्रतिष्ठा । प्रतिष्ठा च । प्रतिष्ठेति प्रति—स्था । च पुरुषसम्मितः । पुरुषसम्मितो वै । पुरुषसम्मित इति पुरुष—सम्मितः । वा एषः । एष यज्ञः । यज्ञोऽस्थूरिः । अस्थूरिर् यम् । ॥ [१] ॥ यम् कामम् । कामम् कामयते । कामयते तम् । तमेतेन । एतेनाभि । अभ्यश्ञुते । अश्ञुते सर्वम् । सर्वꣳ हि । ह्यस्थूरिणा । अस्थूरिणाऽभ्यश्ञुते । अभ्यश्ञुतेऽग्निष्टोमेन । अभ्यश्ञुत इत्यभि—अश्ञुते । अग्निष्टोमेन वै । अग्निष्टोमेनेत्यग्नि—स्तोमेन । वै प्रजापतिः । प्रजापतिः प्रजाः । प्रजापतिरिति प्रजा—पतिः । प्रजा असृजत । प्रजा इति प्र—जाः । असृजत ताः । ता अग्निष्टो-

मेन। अग्निष्टोमेनैव। अग्निष्टोमेनेत्यग्नि—स्तोमेन। एव परि। पर्यगृह्णात्। अगृह्णात् तासाम्। तासाम् परिगृहीतानाम्। परिगृहीतानामश्वतरः। परिगृहीतानामिति परि—गृहीतानाम्। अश्वतरोऽति। अत्यप्रवत। अप्रवत तस्य। तस्यानुहाय। अनुहाय रेतः। अनुहायेत्यनु—हाय। रेत आ। आऽदत्त। अदत्त तत्। तद् गर्दभे। गर्दभे नि। न्यमार्ट्। अमार्ट् तस्मात्। तस्माद् गर्दभः। गर्दभो द्विरेताः। द्विरेता अथो। द्विरेता इति द्वि—रेताः। अथो आहुः। अथो इत्यथो। आहुर् वडबायाम्। वडबायाम् नि। न्यमार्ट्। अमार्डिति। इति तस्मात्। तस्माद् वडबा। वडबा द्विरेताः। द्विरेता अथो। द्विरेता इति द्वि—रेताः। अथो आहुः। अथो इत्यथो। आहुरोषधीषु। ओषधीषु नि। ॥ [२] ॥ न्यमार्ट्। अमार्डिति। इति तस्मात्। तस्मादोषधयः। ओषधयोऽनभ्यक्ताः। अनभ्यक्ता रेभन्ति। अनभ्यक्ता इत्यनभि—अक्ताः। रेभन्त्यथो। अथो आहुः। अथो इत्यथो। आहुः प्रजासु। प्रजासु नि। प्रजास्विति प्र—जासु। न्यमार्ट्। अमार्डिति। इति तस्मात्। तस्माद् यमौ। यमौ जायेते। जायेते तस्मात्। जायेते इति जायेते। तस्मादश्वतरः। अश्वतरो न। न प्र। प्र जायते। जायत आत्तरेताः। आत्तरेता हि। आत्तरेता इत्यात्त—रेताः। हि तस्मात्। तस्माद् बर्हिषि। बर्हिष्यनवक्लृप्तः। अनवक्लृप्तः सर्ववेदसे। अनवक्लृप्त इत्यनव—क्लृप्तः। सर्ववेदसे वा। सर्ववेदस इति सर्व—वेदसे। वा सहस्रे। सहस्रे वा। वाऽवक्लृप्तः। अवक्लृप्तोऽति। अवक्लृप्त इत्यव—क्लृप्तः। अति हि। ह्यप्रवत। अप्रवत यः। य एवम्। एवँविद्वान्। विद्वानग्निष्टोमेन। अग्निष्टोमेन यजते। अग्निष्टोमेनेत्यग्नि—स्तोमेन। यजते प्र। प्राजाताः। अजाताः प्रजाः। प्रजा जनयति। प्रजा इति प्र—जाः। जनयति परि। परि प्रजाताः। प्रजाता गृह्णाति। प्रजाता इति प्र—जाताः। गृह्णाति तस्मात्। तस्मादाहुः। आहुर् ज्येष्ठयज्ञः। ज्येष्ठयज्ञ इति। ज्येष्ठयज्ञ इति ज्येष्ठ—यज्ञः। इति प्रजापतिः। ॥ [३] ॥ प्रजापतिर् वाव। प्रजापतिरिति प्रजा—पतिः। वाव ज्येष्ठः। ज्येष्ठः सः। स हि। ह्येतेन। एतेनाग्रे। अग्रेऽयजत। अयजत प्रजापतिः। प्रजापतिरकामयत। प्रजापतिरिति प्रजा—पतिः। अकामयत प्र। प्र जायेय। जायेयेति। इति सः। स मुखतः। मुखत स्त्रिवृतम्। त्रिवृतम् निः। त्रिवृतमिति त्रि—वृतम्। निरमिमीत। अमिमीत तम्। तमग्निः। अग्निर् देवता। देवताऽनु। अन्वसृज्यत। असृज्यत गायत्री। गायत्री छन्दः। छन्दो रथन्तरम्। रथन्तरꣳ साम। रथन्तरमिति रथम्—तरम्। साम ब्राह्मणः। ब्राह्मणो मनु-

ष्याणाम्। मनुष्याणामजः। अजः पशूनाम्। पशूनाम् तस्मात्। तस्मात् ते। ते मुख्याः। मुख्या मुखतः। मुखतो हि। ह्यसृज्यन्त। असृज्यन्तोरसः। उरसो बाहुभ्याम्। बाहुभ्याम् पञ्चदशम्। बाहुभ्यामिति बाहु—भ्याम्। पञ्चदशम् निः। पञ्चदशमिति पञ्च—दशम्। निरमिमीत। अमिमीत तम्। तमिन्द्रः। इन्द्रो देवता। देवताऽनु। अन्वसृज्यत। असृज्यत त्रिष्टुप्। त्रिष्टुप् छन्दः। छन्दो बृहत्। बृहथ् साम। ॥ [४] ॥ साम राजन्यः। राजन्यो मनुष्याणाम्। मनुष्याणामविः। अविः पशूनाम्। पशूनाम् तस्मात्। तस्मात् ते। ते वीर्यावन्तः। वीर्यावन्तो वीर्यात्। वीर्यावन्त इति वीर्य—वन्तः। वीर्याद्धि। ह्यसृज्यन्त। असृज्यन्त मद्ध्यतः। मद्ध्यतः सप्तदशम्। सप्तदशम् निः। सप्तदशमिति सप्त—दशम्। निरमिमीत। अमिमीत तम्। तँविश्वे। विश्वे देवाः। देवा देवताः। देवता अनु। अन्वसृज्यन्त। असृज्यन्त जगती। जगती छन्दः। छन्दो वैरूपम्। वैरूपꣳ साम। साम वैश्यः। वैश्यो मनुष्याणाम्। मनुष्याणाम् गावः। गावः पशूनाम्। पशूनाम् तस्मात्। तस्मात् ते। त आद्याः। आद्या अन्नधानात्। अन्नधानाद्धि। अन्नधानादित्यन्न—धानात्। ह्यसृज्यन्त। असृज्यन्त तस्मात्। तस्माद् भूयाꣳसः। भूयाꣳसोऽन्येभ्यः। अन्येभ्यो भूयिष्ठाः। भूयिष्ठा हि। हि देवताः। देवता अनु। अन्वसृज्यन्त। असृज्यन्त पत्तः। पत्त एकविꣳशम्। एकविꣳशम् निः। एकविꣳशमित्येक—विꣳशम्। निरमिमीत। अमिमीत तम्। तमनुष्टुप्। अनुष्टुप् छन्दः। अनुष्टुबित्यनु—स्तुप्। छन्दोऽनु। ॥ [५] ॥ अन्वसृज्यत। असृज्यत वैराजम्। वैराजꣳ साम। साम शूद्रः। शूद्रो मनुष्याणाम्। मनुष्याणामश्वः। अश्वः पशूनाम्। पशूनाम् तस्मात्। तस्मात् तौ। तौ भूतसङ्क्रामिणौ। भूतसङ्क्रामिणावश्वः। भूतसङ्क्रामिणाविति भूत—सङ्क्रामिणौ। अश्वश्च। च शूद्रः। शूद्रश्च। च तस्मात्। तस्माच्छूद्रः। शूद्रो यज्ञे। यज्ञेऽनवक्लृप्तः। अनवक्लृप्तो न। अनवक्लृप्त इत्यनव—क्लृप्तः। न हि। हि देवताः। देवता अनु। अन्वसृज्यत। असृज्यत तस्मात्। तस्मात् पादौ। पादावुप। उप जीवतः। जीवतः पत्तः। पत्तो हि। ह्यसृज्येताम्। असृज्येताम् प्राणाः। प्राणा वै। प्राणा इति प्र—अनाः। वै त्रिवृत्। त्रिवृदर्द्धमासाः। त्रिवृदिति त्रि—वृत्। अर्द्धमासाः पञ्चदशः। अर्द्धमासा इत्यर्द्ध—मासाः। पञ्चदशः प्रजापतिः। पञ्चदश इति पञ्च—दशः। प्रजापतिः सप्तदशः। प्रजापतिरिति प्रजा—पतिः। सप्तदशास्त्रयः। सप्तदश इति सप्त—दशः। त्रय इमे। इमे लोकाः। लोका असौ। असावादित्यः।

आदित्य एकविꣳशः। एकविꣳश एतस्मिन्न्। एकविꣳश इत्येक—विꣳशः। एतस्मिन् वै। वा एते। एते श्रिताः। श्रिता एतस्मिन्न्। एतस्मिन् प्रतिष्ठिताः। प्रतिष्ठिता यः। प्रतिष्ठिता इति प्रति—स्थिताः। य एवम्। एवँव्वेद। वेदैतस्मिन्न्। एतस्मिन्नेव। एव श्रयते। श्रयत एतस्मिन्न्। एतस्मिन् प्रति। प्रति तिष्ठति। तिष्ठतीति तिष्ठति॥ ॥ [६] ॥

(अस्थूरि रोषधीषु ज्येष्ठयज्ञ इति बृह दनुष्टुप् छन्दः प्रतिष्ठिता नव च) ॥ १ ॥

प्रातस्सवने वै। प्रातस्सवन इति प्रातः—सवने। वै गायत्रेण। गायत्रेण छन्दसा। छन्दसा त्रिवृते। त्रिवृते स्तोमाय। त्रिवृत इति त्रि—वृते। स्तोमाय ज्योतिः। ज्योतिर् दधत्। दधदेति। एति त्रिवृता। त्रिवृता ब्रह्मवर्चसेन। त्रिवृतेति त्रि—वृता। ब्रह्मवर्चसेन पञ्चदशाय। ब्रह्मवर्चसेनेति ब्रह्म—वर्चसेन। पञ्चदशाय ज्योतिः। पञ्चदशायेति पञ्च—दशाय। ज्योतिर् दधत्। दधदेति। एति पञ्चदशेन। पञ्चदशेनौजसा। पञ्चदशेनेति पञ्च—दशेन। ओजसा वीर्येण। वीर्येण सप्तदशाय। सप्तदशाय ज्योतिः। सप्तदशायेति सप्त—दशाय। ज्योतिर् दधत्। दधदेति। एति सप्तदशेन। सप्तदशेन प्राजापत्येन। सप्तदशेनेति सप्त—दशेन। प्राजापत्येन प्रजननेन। प्राजापत्येनेति प्राजा—पत्येन। प्रजननेनैकविꣳशाय। प्रजननेनेति प्र—जननेन। एकविꣳशाय ज्योतिः। एकविꣳशायेत्येक—विꣳशाय। ज्योतिर् दधत्। दधदेति। एति स्तोमः। स्तोम एव। एव तत्। तथ् स्तोमाय। स्तोमाय ज्योतिः। ज्योतिर् दधत्। दधदेति। एत्यथो। अथो स्तोमे। अथो इत्यथो। स्तोम एव। एव स्तोमम्। स्तोममभि। अभि प्र। प्र णयति। नयति यावन्तः। यावन्तो वै। वै स्तोमाः। स्तोमास्तावन्तः। तावन्तः कामाः। कामास्तावन्तः। तावन्तो लोकाः। लोकास्तावन्ति। तावन्ति ज्योतीꣳषि। ज्योतीꣳष्येतावतः। एतावत एव। एव स्तोमान्। स्तोमानेतावतः। एतावतः कामान्। कामानेतावतः। एतावतो लोकान्। लोकानेतावन्ति। एतावन्ति ज्योतीꣳषि। ज्योतीꣳष्यव। अव रुन्धे। रुन्ध इति रुन्धे॥ ॥ [७] ॥

(तावन्तो लोका स्त्रयोदश च) ॥ २ ॥

ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति सः। स तु। त्वै। वै यजेत। यजेत यः। योऽग्निष्टोमेन। अग्निष्टोमेन यजमानः। अग्निष्टोमेनेत्यग्नि—स्तोमेन। यजमानोऽथ। अथ सर्वस्तोमेन। सर्वस्तोमेन यजेत। सर्वस्तोमेनेति सर्व—स्तोमेन। यजेतेति। इति यस्य। यस्य त्रिवृतम्। त्रिवृतमन्तर्यन्ति। त्रिवृतमिति त्रि—वृतम्। अन्तर्यन्ति प्राणान्। अन्तर्यन्तीत्यन्तः—यन्ति। प्राणाꣳस्तस्य। प्राणानिति प्र—अनान्। तस्यान्तः। अन्तर्यन्ति। यन्ति प्राणेषु। प्राणेषु मे। प्राणेष्विति प्र—अनेषु। मेऽपि। अप्यसत्। असदिति। इति खलु। खलु वै। वै यज्ञेन। यज्ञेन यजमानः। यजमानो यजते। यजते यस्य। यस्य पञ्चदशम्। पञ्चदशमन्तर्यन्ति। पञ्चदशमिति पञ्च—दशम्। अन्तर्यन्ति वीर्यम्। अन्तर्यन्तीत्यन्तः—यन्ति। वीर्यम् तस्य। तस्यान्तः। अन्तर्यन्ति। यन्ति वीर्ये। वीर्ये मे। मेऽपि। अप्यसत्। असदिति। इति खलु। खलु वै। वै यज्ञेन। यज्ञेन यजमानः। यजमानो यजते। यजते यस्य। यस्य सप्तदशम्। सप्तदशमन्तर्यन्ति। सप्तदशमिति सप्त—दशम्। अन्तर्यन्ति प्रजाम्। अन्तर्यन्तीत्यन्तः—यन्ति। ॥ [८] ॥ प्रजाम् तस्य। प्रजामिति प्र—जाम्। तस्यान्तः। अन्तर् यन्ति। यन्ति प्रजायाम्। प्रजायाम् मे। प्रजायामिति प्र—जायाम्। मेऽपि। अप्यसत्। असदिति। इति खलु। खलु वै। वै यज्ञेन। यज्ञेन यजमानः। यजमानो यजते। यजते यस्य। यस्यैकविꣳशम्। एकविꣳशमन्तर्यन्ति। एकविꣳशमित्येक—विꣳशम्। अन्तर्यन्ति प्रतिष्ठाम्। अन्तर्यन्तीत्यन्तः—यन्ति। प्रतिष्ठाम् तस्य। प्रतिष्ठामिति प्रति—स्थाम्। तस्यान्तः। अन्तर् यन्ति। यन्ति प्रतिष्ठायाम्। प्रतिष्ठायाम् मे। प्रतिष्ठायामिति प्रति—स्थायाम्। मेऽपि। अप्यसत्। असदिति। इति खलु। खलु वै। वै यज्ञेन। यज्ञेन यजमानः। यजमानो यजते। यजते यस्य। यस्य त्रिणवम्। त्रिणवमन्तर्यन्ति। त्रिणवमिति त्रि—नवम्। अन्तर्यन्त्यृतून्। अन्तर्यन्तीत्यन्तः—यन्ति। ऋतूꣳश्च। च तस्य। तस्य नक्षत्रियाम्। नक्षत्रियाम् च। च विराजम्। विराजमन्तः। विराजमिति वि—राजम्। अन्तर् यन्ति। यन्त्यृतुषु। ऋतुषु मे। मेऽपि। अप्यसत्। असन् नक्षत्रियायाम्। नक्षत्रियायाम् च। च विराजि। विराजीति। विराजीति वि—राजि। इति खलु। ॥ [९] ॥ खलु वै। वै यज्ञेन। यज्ञेन यजमानः। यजमानो यजते। यजते यस्य। यस्य त्रयस्त्रिꣳशम्। त्रयस्त्रिꣳशमन्तर्यन्ति। त्रयस्त्रिꣳशमिति त्रयः—त्रिꣳशम्। अन्तर्यन्ति देवताः।

अन्तर्यन्तीत्यन्तः—यन्ति। देवतास्तस्य। तस्यान्तः। अन्तर् यन्ति। यन्ति देवतासु। देवतासु मे। मेऽपि। अप्यसत्। असदिति। इति खलु। खलु वै। वै यज्ञेन। यज्ञेन यजमानः। यजमानो यजते। यजते यः। यो वै। वै स्तोमानाम्। स्तोमानामवमम्। अवमम् परमताम्। परमताम् गच्छन्तम्। गच्छन्तव्वेँद। वेद परमताम्। परमतामेव। एव गच्छति। गच्छति त्रिवृत्। त्रिवृद् वै। त्रिवृदिति त्रि—वृत्। वै स्तोमानाम्। स्तोमानामवमः। अवमस्त्रिवृत्। त्रिवृत् परमः। त्रिवृदिति त्रि—वृत्। परमो यः। य एवम्। एवव्वेँद। वेद परमताम्। परमतामेव। एव गच्छति। गच्छतीति गच्छति॥ ॥ [१०] ॥

(सप्तदशमन्तर्यन्ति विराजीति चतुश्चत्वारिꣳशच्च) ॥ ३ ॥

---

अङ्गिरसो वै। वै सत्रम्। सत्रमासत। आसत ते। ते सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन् तेषाम्। तेषाꣳ हविष्मान्। हविष्माꣳश्च। च हविष्कृत्। हविष्कृच्च च। हविष्कृदिति हविः—कृत्। चाहीयेताम्। अहीयेताम् तौ। तावकामयेताम्। अकामयेताꣳ सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमियाव। इयावेति। इति तौ। तावेतम्। एतम् द्विरात्रम्। द्विरात्रमपश्यताम्। द्विरात्रमिति द्वि—रात्रम्। अपश्यताम् तम्। तमा। आऽहरताम्। अहरताम् तेन। तेनायजेताम्। अयजेताम् ततः। ततो वै। वै तौ। तौ सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमैताम्। ऐताय्यँः। य एवम्। एवव्विँद्वान्। विद्वान् द्विरात्रेण। द्विरात्रेण यजते। द्विरात्रेणेति द्वि—रात्रेण। यजते सुवर्गम्। सुवर्गमेव। सुवर्गमिति सुवः—गम्। एव लोकम्। लोकमेति। एति तौ। तावैताम्। ऐताम् पूर्वेण। पूर्वेणाह्ना। अह्नाऽगच्छताम्। अगच्छतामुत्तरेण। उत्तरेणाभिप्लवः। उत्तरेणेत्युत्—तरेण। ॥ [११] ॥ अभिप्लवः पूर्वम्। अभिप्लव इत्यभि—प्लवः। पूर्वमहः। अहर् भवति। भवति गतिः। गतिरुत्तरम्। उत्तरम् ज्योतिष्टोमः। उत्तरमित्युत्—तरम्। ज्योतिष्टोमोऽग्निष्टोमः। ज्योतिष्टोम इति ज्योतिः—स्तोमः। अग्निष्टोमः पूर्वम्। अग्निष्टोम इत्यग्नि—स्तोमः। पूर्वमहः। अहर् भवति। भवति तेजः। तेजस्तेन। तेनाव। अव रुन्धे। रुन्धे सर्वस्तोमः। सर्वस्तोमोऽतिरात्रः। सर्वस्तोम इति सर्व—स्तोमः। अतिरात्र उत्तरम्। अतिरात्र

इत्यति—रात्रः। उत्तरꣳ सर्वस्य। उत्तरमित्युत्—तरम्। सर्वस्याप्त्यै। आप्त्यै सर्वस्य। सर्वस्या-वरुद्ध्यै। अवरुद्ध्यै गायत्रम्। अवरुद्ध्या इत्यव—रुद्ध्यै। गायत्रम् पूर्वे। पूर्वेऽहन्न्। अहन्थ् साम। साम भवति। भवति तेजः। तेजो वै। वै गायत्री। गायत्री गायत्री। गायत्री ब्रह्म-वर्चसम्। ब्रह्मवर्चसम् तेजः। ब्रह्मवर्चसमिति ब्रह्म—वर्चसम्। तेज एव। एव ब्रह्मवर्चसम्। ब्रह्मवर्चसमात्मन्न्। ब्रह्मवर्चसमिति ब्रह्म—वर्चसम्। आत्मन् धत्ते। धत्ते त्रैष्टुभम्। त्रैष्टुभमु-त्तरे। उत्तर ओजः। उत्तर इत्युत्—तरे। ओजो वै। वै वीर्यम्। वीर्यम् त्रिष्टुक्। त्रिष्टुगोजः। ओज एव। एव वीर्यम्। वीर्यमात्मन्न्। आत्मन् धत्ते। धत्ते रथन्तरम्। रथन्तरम् पूर्वे। रथ-न्तरमिति रथम्—तरम्। पूर्वेऽहन्न्। ॥ [१२] ॥ अहन्थ् साम। साम भवति। भवतीयम्। इयव्वै। वै रथन्तरम्। रथन्तरमस्याम्। रथन्तरमिति रथम्—तरम्। अस्यामेव। एव प्रति। प्रति तिष्ठति। तिष्ठति बृहत्। बृहदुत्तरे। उत्तरेऽसौ। उत्तर इत्युत्—तरे। असौ वै। वै बृहत्। बृहदमुष्याम्। अमुष्यामेव। एव प्रति। प्रति तिष्ठति। तिष्ठति तत्। तदाहुः। आहुः क्व। क्व जगती। जगती च। चानुष्टुप्। अनुष्टुप् च। अनुष्टुबित्यनु—स्तुप्। चेति। इति वैखानसम्। वैखानसम् पूर्वे। पूर्वेऽहन्न्। अहन्थ् साम। साम भवति। भवति तेन। तेन जगत्यै। जगत्यै न। नैति। एति षोडशि। षोडश्युत्तरे। उत्तरे तेन। उत्तर इत्युत्—तरे। तेनानुष्टुभः। अनु-ष्टुभोऽथ। अनुष्टुभ इत्यनु—स्तुभः। अथाहुः। आहुर् यत्। यथ् समाने। समानेऽर्द्धमासे। अर्द्धमासे स्याताम्। अर्द्धमास इत्यर्द्ध—मासे। स्यातामन्यतरस्य। अन्यतरस्याह्नः। अह्नो वीर्यम्। वीर्यमनु। अनु पद्येत। पद्येतेति। इत्यमावास्यायाम्। अमावास्यायाम् पूर्वम्। अमा-वास्यायामित्यमा—वास्यायाम्। पूर्वमहः। अहर् भवति। भवत्युत्तरस्मिन्न्। उत्तरस्मिन्नुत्तरम्। उत्तरस्मिन्नित्युत्—तरस्मिन्न्। उत्तरम् नाना। उत्तरमित्युत्—तरम्। नानैव। एवार्द्धमासयोः। अर्द्धमासयोर् भवतः। अर्द्धमासयोरित्यर्द्ध—मासयोः। भवतो नानावीर्ये। नानावीर्ये भवतः। नानावीर्ये इति नाना—वीर्ये। भवतो हविष्मन्निधनम्। हविष्मन्निधनम् पूर्वम्। हविष्मन्निधनमिति हविष्मत्—निधनम्। पूर्वमहः। अहर् भवति। भवति हविष्कृन्निधनम्। हविष्कृन्निधनमुत्तरम्। हविष्कृन्निधनमिति हविष्कृत्—निधनम्। उत्तरम् प्रतिष्ठित्यै। उत्तरमित्युत्—तरम्। प्रतिष्ठित्या इति प्रति—स्थित्यै॥ ॥ [१३] ॥

(उत्त॑रेण रथन्त॒रम् पूर्वे॑ ऽन्वे॑ कवि॒ꣳशतिश्च) ॥ ४ ॥

आपो॒ वै। वा इ॒दम्। इ॒दमग्रे᳚। अग्रे॑ सलि॒लम्। स॒लि॒लमा॑सीत्। आ॒सी॒त् तस्मि॑न्न्। तस्मि॑न् प्र॒जाप॑तिः। प्र॒जाप॑तिर् वा॒युः। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। वा॒युर् भू॒त्वा। भू॒त्वाऽच॑रत्। अ॒च॒र॒थ् सः। स इ॒माम्। इ॒माम॑पश्यत्। अ॒प॒श्य॒त् ताम्। ताँव्व॑रा॒हः। व॒रा॒हो भू॒त्वा। भू॒त्वा ऽऽ ह॑रत्। आ ऽह॑रत्। अ॒ह॒र॒त् ताम्। ताँव्वि॒श्वक॑र्मा। वि॒श्वक॑र्मा भू॒त्वा। वि॒श्वक॒र्मेति॑ वि॒श्व—क॒र्मा। भू॒त्वा वि। व्य॑मार्ट्। अ॒मा॒र्ट्॒थ् सा। साऽप्र॑थत। अ॒प्र॒थ॒त॒ सा। सा पृ॑थि॒वी। पृ॒थि॒व्य॑भवत्। अ॒भ॒व॒त् तत्। तत् पृ॑थि॒व्यै। पृ॒थि॒व्यै पृ॑थिवि॒त्वम्। पृ॒थि॒वि॒त्वम् तस्या᳚म्। पृ॒थि॒वि॒त्वमिति॑ पृथिवि—त्वम्। तस्या॑मश्राम्यत्। अ॒श्रा॒म्य॒त् प्र॒जाप॑तिः। प्र॒जाप॑ति॒ः सः। प्र॒जाप॑ति॒रिति॑ प्र॒जा—प॒तिः। स दे॒वान्। दे॒वान॑सृजत। अ॒सृ॒ज॒त वसू॑न्। वसू᳚न् रु॒द्रान्। रु॒द्राना॑दि॒त्यान्। आ॒दि॒त्यान् ते। ते दे॒वाः। दे॒वाः प्र॒जाप॑तिम्। प्र॒जाप॑तिमब्रुवन्न्। प्र॒जाप॑ति॒मिति॑ प्र॒जा—प॒ति॒म्। अ॒ब्रु॒व॒न् प्र। प्र जा॑यामहै। जा॒या॒म॒हा॒ इति॑। इति॒ सः। सो᳚ऽब्रवीत्। अ॒ब्र॒वी॒द् यथा᳚। ॥ [१४] ॥ यथा॒हम्। अ॒हय्ँयु॒ष्मान्। यु॒ष्माꣳस्तप॑सा। त॒पसाऽसृ॑ख्षि। अ॒सृ॑ख्ष्ये॒वम्। ए॒वम् तप॑सि। तप॑सि प्र॒जन॑नम्। प्र॒जन॑नमि-च्छद्ध्वम्। प्र॒जन॑न॒मिति॑ प्र—जन॑नम्। इ॒च्छ॒द्ध्व॒मिति॑। इति॒ तेभ्य॑ः। तेभ्यो॒ऽग्निम्। अ॒ग्निमा॒-यत॑नम्। आ॒यत॑न॒म् प्र। आ॒यत॑न॒मित्या᳚—यत॑नम्। प्राय॑च्छत्। अ॒य॒च्छ॒दे॒तेन॑। ए॒तेना॒यत॑नेन। आ॒यत॑नेन श्राम्यत। आ॒यत॑ने॒नेत्या᳚—यत॑नेन। श्रा॒म्य॒तेति॑। इति॒ ते। ते᳚ऽग्निना᳚। अ॒ग्निना॒ऽऽय-त॑नेन। आ॒यत॑नेनाश्राम्यन्न्। आ॒यत॑ने॒नेत्या᳚—यत॑नेन। अ॒श्रा॒म्य॒न् ते। ते सँ॑व्वथ्स॒रे। सँ॒व्व॒थ्स॒र एका᳚म्। सँ॒व्व॒थ्स॒र इति॑ सम्—व॒थ्स॒रे। एका॒म् गाम्। गाम॑सृजन्त। अ॒सृ॒ज॒न्त॒ ताम्। ताँव्व॒-सु॑भ्यः। वसु॑भ्यो रु॒द्रेभ्य॑ः। वसु॑भ्य॒ इति॒ वसु॑—भ्य॒ः। रु॒द्रेभ्य॑ आ॒दि॒त्येभ्य॑ः। आ॒दि॒त्येभ्य॒ः प्र। प्राय॑च्छन्न्। अ॒य॒च्छ॒न्ने॒ताम्। ए॒ताꣳ र॑ख्षद्ध्वम्। र॒ख्ष॒द्ध्व॒मिति॑। इति॒ ताम्। ताँव्वस॑वः। वस॑वो रु॒द्राः। रु॒द्रा आ॑दि॒त्याः। आ॒दि॒त्या अ॑रख्षन्त। अ॒र॒ख्ष॒न्त॒ सा। सा वसु॑भ्यः। वसु॑भ्यो रु॒द्रेभ्य॑ः। वसु॑भ्य॒ इति॒ वसु॑—भ्य॒ः। रु॒द्रेभ्य॑ आ॒दि॒त्येभ्य॑ः। आ॒दि॒त्येभ्य॒ः प्र। प्राजा॑यत। अ॒जा॒य॒त त्रीणि॑। त्रीणि॑ च। च॒ श॒तानि॑। ॥ [१५] ॥ श॒तानि॒ त्रय॑स्त्रिꣳशतम्। त्रय॑स्त्रिꣳशतम् च। त्रय॑-स्त्रिꣳश॒त॒मिति॒ त्रय॑ः—त्रि॒ꣳ॒श॒त॒म्। चाथ॑। अथ॒ सा। सैव। ए॒व स॑हस्रत॒मी। स॒ह॒स्र॒त॒म्य॑भवत्।

सहस्रतमीीति सहस्र—तमी। अभवत् ते। ते देवाः। देवाः प्रजापतिम्। प्रजापतिमब्रुवन्न्। प्रजापतिमिति प्रजा—पतिम्। अब्रुवन्थ् सहस्रेण। सहस्रेण नः। नो याजय। याजयेति। इति सः। सोऽग्निष्टोमेन। अग्निष्टोमेन वसून्। अग्निष्टोमेनेत्यग्नि—स्तोमेन। वसूनयाजयत्। अयाजयत् ते। त इमम्। इमँल्लोकम्। लोकमजयन्न्। अजयन् तत्। तच् च। चाददुः। अददुः सः। स उक्थ्येन। उक्थ्येन रुद्रान्। रुद्रानयाजयत्। अयाजयत् ते। तेऽन्तरिक्षम्। अन्तरिक्षमजयन्न्। अजयन् तत्। तच् च। चाददुः। अददुः सः। सोऽतिरात्रेण। अतिरात्रेणादित्यान्। अतिरात्रेणेत्यति—रात्रेण। आदित्यानयाजयत्। अयाजयत् ते। तेऽमुम्। अमुँल्लोकम्। लोकमजयन्न्। अजयन् तत्। तच् च। चाददुः। अददुस्तत्। तदन्तरिक्षम्। अन्तरिक्षवँव्यवैर्यत। ॥ [१६] ॥ व्यवैर्यत तस्मात्। व्यवैर्यतेति वि—अवैर्यत। तस्माद् रुद्राः। रुद्रा घातुकाः। घातुका अनायतनाः। अनायतना हि। अनायतना इत्यना—यतनाः। हि तस्मात्। तस्मादाहुः। आहुः शिथिलम्। शिथिलँवै। वै मद्ध्यमम्। मद्ध्यममहः। अहस्त्रिरात्रस्य। त्रिरात्रस्य वि। त्रिरात्रस्येति त्रि—रात्रस्य। वि हि। हि तत्। तदवैर्यत। अवैर्यतेति। अवैर्यतेत्यव—ऐर्यत। इति त्रैष्टुभम्। त्रैष्टुभम् मद्ध्यमस्य। मद्ध्यमस्याह्नः। अह्न आज्यम्। आज्यम् भवति। भवति सँय्यानानि। सँय्यानानि सूक्तानि। सँय्यानानीति सम्—यानानि। सूक्तानि शꣳसति। सूक्तानीति सु—उक्तानि। शꣳसति षोडशिनम्। षोडशिनꣳ शꣳसति। शꣳसत्यह्नः। अह्नो धृत्यै। धृत्या अशिथिलम्भावाय। अशिथिलम्भावाय तस्मात्। अशिथिलम्भावायेत्यशिथिलम्—भावाय। तस्मात् त्रिरात्रस्य। त्रिरात्रस्याग्निष्टोमः। त्रिरात्रस्येति त्रि—रात्रस्य। अग्निष्टोम एव। अग्निष्टोम इत्यग्नि—स्तोमः। एव प्रथमम्। प्रथममहः। अहः स्यात्। स्यादथ। अथोक्थ्यः। उक्थ्योऽथ। अथातिरात्रः। अतिरात्र एषाम्। अतिरात्र इत्यति—रात्रः। एषाँल्लोकानाम्। लोकानाव्ँविधृत्यै। विधृत्यै त्रीणित्रीणि। विधृत्या इति वि—धृत्यै। त्रीणित्रीणि शतानि। त्रीणित्रीणीति त्रीणि—त्रीणि। शतान्यनूचीनाहम्। अनूचीनाहमव्यवच्छिन्नानि। अनूचीनाहमित्यनूचीन—अहम्। अव्यवच्छिन्नानि ददाति। अव्यवच्छिन्नानीत्यवि—अवच्छन्नानि। ददात्येषाम्। ॥ [१७] ॥ एषाँल्लोकानाम्। लोकानामनु। अनु सन्तत्यै। सन्तत्यै दशतम्। सन्तत्या इति सम्—तत्यै। दशतम् न। न वि। विच्छिन्द्यात्। छिन्द्याद् विराजम्। विराजम् न। विराजमिति वि—राजम्। नेत्।

इद् विच्छिनदानि। विच्छिनदानीति। विच्छिनदानीति वि—छिनदानि। इत्यथ। अथ या। या सहस्रतमी। सहस्रतम्यासीत्। सहस्रतमीति सहस्र—तमी। आसीत् तस्याम्। तस्यामिन्द्रः। इन्द्रश्च। च विष्णुः। विष्णुश्च। च व्यायच्छेताम्। व्यायच्छेताꣳ सः। व्यायच्छेतामिति वि—आयच्छेताम्। स इन्द्रः। इन्द्रोऽमन्यत। अमन्यतानया। अनया वै। वा इदम्। इदँव्विष्णुः। विष्णुः सहस्रम्। सहस्रँव्वर्क्ष्यते। वर्क्ष्यत इति। इति तस्याम्। तस्यामकल्पेताम्। अकल्पेताम् द्विभागे। द्विभाग इन्द्रः। द्विभाग इति द्वि—भागे। इन्द्रस्तृतीये। तृतीये विष्णुः। विष्णुस्तत्। तद् वै। वा एषा। एषाऽभ्यनूच्यते। अभ्यनूच्यत उभा। अभ्यनूच्यत इत्यभि—अनूच्यते। उभा जिग्यथुः। जिग्यथुरिति। इति ताम्। ताँव्वै। वा एताम्। एतामच्छावाकः। अच्छावाक एव। ॥ [१८] ॥ एव शꣳसति। शꣳसत्यथ। अथ या। या सहस्रतमी। सहस्रतमी सा। सहस्रतमीति सहस्र—तमी। सा होत्रे। होत्रे देया। देयेति। इति होतारम्। होतारँव्वै। वा अभ्यतिरिच्यते। अभ्यतिरिच्यते यत्। अभ्यतिरिच्यत इत्यभि—अतिरिच्यते। यदतिरिच्यते। अतिरिच्यते होता। अतिरिच्यत इत्यति—रिच्यते। होताऽनाप्तस्य। अनाप्तस्यापयिता। आपयिताऽथ। अथाहुः। आहुरुन्नेत्रे। उन्नेत्रे देया। उन्नेत्र इत्युत्—नेत्रे। देयेति। इत्यतिरिक्ता। अतिरिक्ता वै। अतिरिक्तेत्यति—रिक्ता। वा एषा। एषा सहस्रस्य। सहस्रस्यातिरिक्तः। अतिरिक्त उन्नेता। अतिरिक्त इत्यति—रिक्तः। उन्नेतर्त्विजाम्। उन्नेतेत्युत्—नेता। ऋत्विजामथ। अथाहुः। आहुः सर्वेभ्यः। सर्वेभ्यः सदस्येभ्यः। सदस्येभ्यो देया। देयेति। इत्यथ। अथाहुः। आहुरुदाकृत्या। उदाकृत्या सा। उदाकृत्येत्युत्—आकृत्या। सा वशम्। वशम् चरेत्। चरेदिति। इत्यथ। अथाहुः। आहुर् ब्रह्मणे। ब्रह्मणे च। चाग्नीधे। अग्नीधे च। अग्नीध इत्यग्नि—इधे। च देया। देयेति। इति द्विभागम्। ॥ [१९] ॥ द्विभागम् ब्रह्मणे। द्विभागमिति द्वि—भागम्। ब्रह्मणे तृतीयम्। तृतीयमग्नीधे। अग्नीध ऐन्द्रः। अग्नीध इत्यग्नि—इधे। ऐन्द्रो वै। वै ब्रह्मा। ब्रह्मा वैष्णवः। वैष्णवोऽग्नीत्। अग्नीद् यथा। अग्नीदित्यग्नि—इत्। यथैव। एव तौ। तावकल्पेताम्। अकल्पेतामिति। इत्यथ। अथाहुः। आहुर् या। या कल्याणी। कल्याणी बहुरूपा। बहुरूपा सा। बहुरूपेति बहु—रूपा। सा देया। देयेति। इत्यथ। अथाहुः। आहुर् या। या द्विरूपा। द्विरूपोभयतएनी। द्विरूपेति द्वि—रूपा। उभयतएनी सा। उभयत,एनीत्युभयतः—एनी। सा

देया᳚। देयेति॑। इति॑ सहस्रस्य॑। सहस्रस्य॒ परि॑गृहीत्यै। परि॑गृहीत्यै॒ तत्। परि॑गृहीत्या॒ इति॒ परि॑— गृही॒त्यै। तद् वै। वा ए॒तत्। ए॒तथ् स॒हस्र॑स्य। स॒हस्र॑स्याय॑नम्। अय॑नꣳ स॒हस्रं॑म्। स॒हस्रं॑ꣳ स्तो॒त्रीया॑ः। स्तो॒त्रीया॑ः स॒हस्रं॑म्। स॒हस्र॑म् द॒क्षिणा॑ः। द॒क्षिणा॑ः स॒हस्र॑सम्मितः। स॒हस्र॑स- म्मितः सु॒व॒र्गः। स॒हस्र॑सम्मित॒ इति॑ स॒हस्र॑—स॒म्मि॒तः। सु॒व॒र्गो लो॒कः। सु॒व॒र्ग इति॑ सुवः—गः। लो॒कः सु॑व॒र्गस्य॑। सु॒व॒र्गस्य॑ लो॒कस्य॑। सु॒व॒र्गस्येति॑ सुवः—गस्य॑। लो॒कस्या॒भिजि॑त्यै। अ॒भि- जि॑त्या इत्य॒भि—जि॒त्यै॥ ॥ [२०] ॥

(अ॒ब्र॒वी॒ च॒ तद॒न्तरि॑क्षम् ददात्य च्छावा॒क श्च॒ देयेति॑ स॒प्तच॑त्वारिꣳशच्च) ॥ ५ ॥

---

सोमो॒ वै। वै स॒हस्रं॑म्। स॒हस्र॑मविन्दत्। अ॒वि॒न्द॒त् तम्। तमिन्द्रः॑। इन्द्रोऽनु॑। अन्व॑विन्दत्। अ॒वि॒न्द॒त् तौ। तौ य॒मः। य॒मो न्याग॑च्छत्। न्याग॑च्छ॒त् तौ। न्याग॑च्छ॒दिति॑ नि—आग॑च्छत्। ताव॑ब्रवीत्। अ॒ब्र॒वी॒दस्तु॑। अस्तु॒ मे। मेऽत्र। अत्रापि॑। अपीति॑। इत्यस्तु॑। अस्तु॒ ही(३)। ही(३) इति॑। इत्य॑ब्रूताम्। अ॒ब्रू॒ता॒ꣳ सः। स य॒मः। य॒म एक॑स्याम्। एक॑स्याँ᳚व्वी॒र्य॑म्। वी॒र्य॑म् परि॑। पर्य॑- पश्यत्। अ॒प॒श्य॒दि॒यम्। इ॒यँव्वै। वा अ॒स्य। अ॒स्य स॒हस्र॑स्य। स॒हस्र॑स्य वी॒र्यं॑म्। वी॒र्य॑म् बिभर्ति॑। बि॒भ॒र्तीति॑। इति॒ तौ। ताव॑ब्रवीत्। अ॒ब्र॒वी॒दि॒यम्। इ॒यम् मम॑। ममास्तु॑। अस्त्वे॒तत्। ए॒तद् यु॒वयो᳚ः। यु॒वयो॒रिति॑। इति॒ तौ। ताव॑ब्रूताम्। अ॒ब्रू॒ता॒ꣳ सर्वा॑। सर्वा॒ वै। वा ए॒तत्। ए॒तदे॒तस्यां᳚म्। ए॒तस्याँ᳚व्वी॒र्यं॑म्। वी॒र्य॑म् परि॑। ॥ [२१] ॥ परि॑ पश्यामः। प॒श्या॒मोऽꣳशं॑म्। अꣳ॒शमा। आ ह॑रामहै। ह॒रा॒म॒हा॒ इति॑। इति॒ तस्यां᳚म्। तस्या॒मꣳशं॑म्। अꣳ॒शमा। आऽह॑रन्त। अ॒ह॒र॒न्त॒ ताम्। ताम॒प्सु। अ॒प्सु प्र। अ॒प्स्वित्य॑प्—सु। प्राव॑शयन्न्। अ॒वे॒श॒य॒न्थ् सोमा॑य। सोमा॑यो॒देहि॑। उ॒दे- हीति॑। उ॒देहीत्यु॑त्—एहि॑। इति॒ सा। सा रोहि॑णी। रोहि॑णी॒ पिङ्ग॑ला। पि॒ङ्ग॒लैक॑हायनी। एक॑हायनी रू॒पम्। एक॑हा॒य॒नीत्येक॑—हा॒य॒नी। रू॒पम् कृ॒त्वा। कृ॒त्वा त्रय॑स्त्रिꣳशता। त्रय॑स्त्रिꣳ- शता च। त्रय॑स्त्रिꣳश॒तेति॒ त्रय॑ः—त्रि॒ꣳश॒ता। च॒ त्रि॒भिः। त्रि॒भिश्च॑। त्रि॒भिरिति॑ त्रि—भिः। च॒ श॒तैः। श॒तैः स॒ह। स॒होदै॑त्। उ॒दै॒त् तस्मा॑त्। उ॒दै॒दित्यु॑त्—ऐत्। तस्मा॑द् रोहि॑ण्या। रोहि॑ण्या पिङ्ग॒लया᳚। पि॒ङ्ग॒लयैक॑हायन्या। एक॑हायन्या॒ सोमं॑म्। एक॑हा॒य॒न्येत्येक॑—हा॒य॒न्या। सोम॑म् क्रीणीयात्। क्री॒णी॒या॒द् यः। य ए॒वम्। ए॒वँव्विद्वान्। वि॒द्वान् रोहि॑ण्या। रोहि॑ण्या पिङ्ग॒लया᳚।

पिङ्गलयैकहायन्या। एकहायन्या सोमम्। एकहायन्येत्येक—हायन्या। सोमम् क्रीणाति। क्रीणाति त्रयस्त्रिꣳशता। त्रयस्त्रिꣳशता च। त्रयस्त्रिꣳशतेति त्रयः—त्रिꣳशता। चैव। एवास्य। अस्य त्रिभिः। त्रिभिश्च। त्रिभिरिति त्रि—भिः। च शतैः। ॥ [२२] ॥ शतैः सोमः। सोमः क्रीतः। क्रीतो भवति। भवति सुक्रीतेन। सुक्रीतेन यजते। सुक्रीतेनेति सु—क्रीतेन। यजते ताम्। तामप्सु। अप्सु प्र। अप्स्वित्यप्—सु। प्रावेशयन्न्। अवेशयन्निन्द्राय। इन्द्रायोदेहि। उदेहीति। उदेहीत्युत्—एहि। इति सा। सा रोहिणी। रोहिणी लख्ष्मणा। लख्ष्मणा पष्ठौही। पष्ठौही वार्त्रघ्नी। वार्त्रघ्नी रूपम्। वार्त्रघ्नीति वार्त्र—घ्नी। रूपम् कृत्वा। कृत्वा त्रयस्त्रिꣳशता। त्रयस्त्रिꣳशता च। त्रयस्त्रिꣳशतेति त्रयः—त्रिꣳशता। च त्रिभिः। त्रिभिश्च। त्रिभिरिति त्रि—भिः। च शतैः। शतैः सह। सहोदैत्। उदैत् तस्मात्। उदैदित्युत्—ऐत्। तस्माद् रोहिणीम्। रोहिणीँल्लख्ष्मणाम्। लख्ष्मणाम् पष्ठौहीम्। पष्ठौहीँव्वार्त्रघ्नीम्। वार्त्रघ्नीम् दद्यात्। वार्त्रघ्नीमिति वार्त्र—घ्नीम्। दद्याद् यः। य एवम्। एवँव्विद्वान्। विद्वान् रोहिणीम्। रोहिणीँल्लख्ष्मणाम्। लख्ष्मणाम् पष्ठौहीम्। पष्ठौहीँव्वार्त्रघ्नीम्। वार्त्रघ्नीम् ददाति। वार्त्रघ्नीमिति वार्त्र—घ्नीम्। ददाति त्रयस्त्रिꣳशत्। त्रयस्त्रिꣳशच्च। त्रयस्त्रिꣳशदिति त्रयः—त्रिꣳशत्। चैव। एवास्य। अस्य त्रीणि। त्रीणि च। च शतानि। शतानि सा। सा दत्ता। दत्ता भवति। ॥ [२३] ॥ भवति ताम्। तामप्सु। अप्सु प्र। अप्स्वित्यप्—सु। प्रावेशयन्न्। अवेशयन्यमाय। यमायोदेहि। उदेहीति। उदेहीत्युत्—एहि। इति सा। सा जरती। जरती मूर्खा। मूर्खा तज्जघन्या। तज्जघन्या रूपम्। तज्जघन्येति तत्—जघन्या। रूपम् कृत्वा। कृत्वा त्रयस्त्रिꣳशता। त्रयस्त्रिꣳशता च। त्रयस्त्रिꣳशतेति त्रयः—त्रिꣳशता। च त्रिभिः। त्रिभिश्च। त्रिभिरिति त्रि—भिः। च शतैः। शतैः सह। सहोदैत्। उदैत् तस्मात्। उदैदित्युत्—ऐत्। तस्माज् जरतीम्। जरतीम् मूर्खाम्। मूर्खाम् तज्जघन्याम्। तज्जघन्यामनुस्तरणीम्। तज्जघन्यामिति तत्—जघन्याम्। अनुस्तरणीम् कुर्वीत। अनुस्तरणीमित्यनु—स्तरणीम्। कुर्वीत यः। य एवम्। एवँव्विद्वान्। विद्वान् जरतीम्। जरतीम् मूर्खाम्। मूर्खाम् तज्जघन्याम्। तज्जघन्यामनुस्तरणीम्। तज्जघन्यामिति तत्—जघन्याम्। अनुस्तरणीम् कुरुते। अनुस्तरणीमित्यनु—स्तरणीम्। कुरुते त्रयस्त्रिꣳशत्। त्रयस्त्रिꣳशच्च। त्रयस्त्रिꣳशदिति त्रयः—त्रिꣳशत्। चैव। एवास्य। अस्य त्रीणि। त्रीणि च। च शतानि। शतानि

सा। साऽमुष्मिन्न्। अमुष्मिँल्लोके। लोके भवति। भवति वाक्। वागेव। एव सहस्रतमी। सह-
स्रतमी तस्मात्। सहस्रतमीति सहस्र—तमी। तस्माद् वरः। ॥ [२४] ॥ वरो देयः। देयः
सा। सा हि। हि वरः। वरः सहस्रम्। सहस्रमस्य। अस्य सा। सा दत्ता। दत्ता भवति। भवति
तस्मात्। तस्माद् वरः। वरो न। न प्रतिगृह्यः। प्रतिगृह्यः सा। प्रतिगृह्य इति प्रति—गृह्यः। सा
हि। हि वरः। वरः सहस्रम्। सहस्रमस्य। अस्य प्रतिगृहीतम्। प्रतिगृहीतम् भवति। प्रतिगृही-
तमिति प्रति—गृहीतम्। भवतीयम्। इयँव्वरः। वर इति। इति ब्रूयात्। ब्रूयादथ। अथान्याम्।
अन्याम् ब्रूयात्। ब्रूयादियम्। इयम् मम। ममेति। इति तथा। तथाऽस्य। अस्य तत्। तथ्
सहस्रम्। सहस्रमप्रतिगृहीतम्। अप्रतिगृहीतम् भवति। अप्रतिगृहीतमित्यप्रति—गृहीतम्।
भवत्युभयत,एनी। उभयत,एनी स्यात्। उभयत,एनीत्युभयतः—एनी। स्यात् तत्। तदाहुः।
आहुरन्यत,एनी। अन्यत,एनी स्यात्। अन्यत,एनीत्यन्यतः—एनी। स्याथ् सहस्रम्। सहस्रम्
परस्तात्। परस्तादेतम्। एतमिति। इति या। यैव। एव वरः। वरः कल्याणी। ॥ [२५] ॥
कल्याणी रूपसमृद्धा। रूपसमृद्धा सा। रूपसमृद्धेति रूप—समृद्धा। सा स्यात्। स्याथ् सा।
सा हि। हि वरः। वरः समृद्ध्यै। समृद्ध्यै ताम्। समृद्ध्या इति सम्—ऋद्ध्यै। तामुत्तरेण।
उत्तरेणाग्नीद्ध्रम्। उत्तरेणेत्युत्—तरेण। आग्नीद्ध्रम् पर्याणीय। आग्नीद्ध्रमित्याग्नि—इद्ध्रम्।
पर्याणीयाहवनीयस्य। पर्याणीयेति परि—आनीय। आहवनीयस्यान्ते। आहवनीयस्येत्या—
हवनीयस्य। अन्ते द्रोणकलशम्। द्रोणकलशमव। द्रोणकलशमिति द्रोण—कलशम्। अव
घ्रापयेत्। घ्रापयेदा। आ जिघ्र। जिघ्र कलशम्। कलशम् महि। मह्युरुधारा। उरुधारा पय-
स्वती। उरुधारेत्युरु—धारा। पयस्वत्या। आ त्वा। त्वा विशन्तु। विशन्त्विन्दवः। इन्दवः
समुद्रम्। समुद्रमिव। इव सिन्धवः। सिन्धवः सा। सा मा। मा सहस्रे। सहस्र आ। आ भज।
भज प्रजया। प्रजया पशुभिः। प्रजयेति प्र—जया। पशुभिः सह। पशुभिरिति पशु—भिः। सह
पुनः। पुनर् मा। मा। आ विशतात्। विशताद् रयिः। रयिरिति। इति प्रजया। प्रजयैव। प्रज-
येति प्र—जया। एवैनम्। एनम् पशुभिः। पशुभी रय्या। पशभिरिति पशु—भिः। रय्या सम्।
समर्द्धयति। ॥ [२६] ॥ अर्द्धयति प्रजावान्। प्रजावान् पशुमान्। प्रजावानिति प्रजा—वान्।
पशुमान् रयिमान्। पशुमानिति पशु—मान्। रयिमान् भवति। रयिमानिति रयि—मान्। भवति

यः। य एवम्। एवव्ँवेद। वेद तया। तया सह। सहाग्नीद्ध्रम्। आग्नीद्ध्रम् परेत्य। आग्नीद्ध्रमित्याग्नि—इद्ध्रम्। परेत्य पुरस्तात्। परेत्येति परा—इत्य। पुरस्तात् प्रतीच्याम्। प्रतीच्याम् तिष्ठन्त्याम्। तिष्ठन्त्याम् जहुयात्। जुहुयादुभा। उभा जिग्यथुः। जिग्यथुर् न। न परा। परा जयेथे। जयेथे न। जयेथे इति जयेथे। न परा। परा जिग्ये। जिग्ये कतरः। कतरश्चन। चनैनोः। एनोरित्येनोः॥ इन्द्रश्च। च विष्णो। विष्णो यत्। विष्णो इति विष्णो। यदपस्पृधेथाम्। अपस्पृधेथाम् त्रेधा। त्रेधा सहस्रम्। सहस्रव्ँवि। वि तत्। तदैरयेथाम्। ऐरयेथामिति। इति त्रेधाविभक्तम्। त्रेधाविभक्तव्ँवै। त्रेधाविभक्तमिति त्रेधा—विभक्तम्। वै त्रिरात्रे। त्रिरात्रे सहस्रम्। त्रिरात्र इति त्रि—रात्रे। सहस्रꣳ साहस्रीम्। साहस्रीमेव। एवैनाम्। एनाम् करोति। करोति सहस्रस्य। सहस्रस्यैव। एवैनाम्। एनाम् मात्राम्। मात्राम् करोति। ॥ [२७] ॥ करोति रूपाणि। रूपाणि जुहोति। जुहोति रूपैः। रूपैरेव। एवैनाम्। एनाꣳ सम्। समर्द्धयति। अर्द्धयति तस्याः। तस्या उपोत्थाय। उपोत्थाय कर्णम्। उपोत्थायेत्युप—उत्थाय। कर्णमा। आ जपेत्। जपेदिडे। इडे रन्ते। रन्तेऽदिते। अदिते सरस्वति। सरस्वति प्रिये। प्रिये प्रेयसि। प्रेयसि महि। महि विश्रुति। विश्रुत्येतानि। विश्रुतीति वि—श्रुति। एतानि ते। ते अघ्निये। अघ्निये नामानि। नामानि सुकृतम्। सुकृतम् मा। सुकृतमिति सु—कृतम्। मा देवेषु। देवेषु ब्रूतात्। ब्रूतादिति। इति देवेभ्यः। देवेभ्य एव। एवैनम्। एनमा। आ वेदयति। वेदयत्यनु। अन्वेनम्। एनम् देवाः। देवा बुद्ध्यन्ते। बुद्ध्यन्त इति बुद्ध्यन्ते॥ ॥ [२८] ॥

(एतदेतस्याम् वीर्यं मस्य त्रिभिश्च दत्ता सहस्रतमी तस्मा देव वरः सम् मात्रा मेकान्न चत्वारिꣳशच्च) ॥ ६ ॥

सहस्रतम्या वै। सहस्रतम्येति सहस्र—तम्या। वै यजमानः। यजमानः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमेति। एति सा। सैनम्। एनꣳ सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकम् गमयति। गमयति सा। सा मा। मा सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकम् गमय। गमयेति। इत्याह। आह सुवर्गम्। सुवर्गमेव। सुवर्गमिति सुवः—गम्। एवैनम्। एनँल्लोकम्। लोकम् गमयति। गमयति सा। सा मा। मा ज्योतिष्मन्तम्। ज्योतिष्मन्तँल्लोकम्। लोकम् गमय। गमयेति। इत्याह। आह

